# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

### ०२५ त्रैराशिकम्

१६ - ०५ - २०१९

# गतकक्ष्यायाम् ...

- गुणकर्मणि केचनोद्देशकाः

# अस्यां कक्ष्यायाम् ...

- त्रैराशिकम्



# त्रैराशिकम्

उद्देशकः

पङ्गुः प्रयाति कश्चिद्दिवसत्रितयेन योजनाष्टांशम् ।
योजनशतं स यास्यति निगद्यतां केन कालेन ॥ (क्रियाक्रमकर्याम्)

अन्वयः - कश्चित् पङ्गुः योजनाष्टांशं दिवसत्रितयेन प्रयाति । सः केन कालेन योजनशतं यास्यति (इति) निगद्यताम् ।

$$\frac{१}{८} \rightarrow ३$$

$$१०० \rightarrow ?$$

$$? = \frac{(१०० \, x \, ३)}{\left(\frac{१}{८}\right)} = २४००$$

# त्रैराशिकम्

उद्देशकः

अत्र $\frac{१}{८}$ = प्रमाणम्

३ = फलम्

१०० = इच्छा

? = इच्छाफलम्

$\frac{१}{८} \rightarrow ३$

$१०० \rightarrow ?$

$$? = \frac{(१०० x ३)}{\left(\frac{१}{८}\right)} = २४००$$

प्रमाणमिच्छा च समानजाती आद्यन्तयोः स्तः फलमन्यजातिः ।
मध्ये तदिच्छाहतमादिहृत् स्यादिच्छाफलं व्यस्तविधिर्विलोमे ॥

अन्वयः - आद्यन्तयोः स्तः प्रमाणम् इच्छा च समानजाती । फलम् अन्यजातिः मध्ये । तत् (फलम्) इच्छाहतम् आदिहृत् इच्छाफलं स्यात् । विलोमे व्यस्तविधिः ।

प्रमाणम् -- आदिः

फलम् -- मध्यः

इच्छा -- अन्तः

$$\frac{(\text{फलं}\,(\text{मध्यः})\,x\ \text{इच्छा}\,(\text{अन्तः}))}{(\text{प्रमाणम्}\,(\text{आदिः}))} = \text{इच्छाफलम्}$$

विलोमे,

$$\frac{(\text{प्रमाणम्}\ x\ \text{फलम्})}{\text{इच्छा}} = \text{इच्छाफलम्}$$



क्रियाक्रमकरी

तत्र प्रमाणराशिरिच्छाराशिश्च द्वौ समानजाती स्याताम् । आद्यन्तयोः स्थितिं चार्हतः । फलराशिः पुनस्ततो भिन्नजातीयो मध्ये । ननु त्रैराशिकोक्तिं प्रतिज्ञाय प्रमाणेच्छाफलराशीनां जातिविशेषसन्निवेशकथने का सङ्गतिरिति चेत् , उक्तमत्र गोविन्दस्वामिना - "कथमिदं त्रैराशिकं नाम । इदमिह त्रैराशिकम् । त्रयो राशयः समाहृताः कारणं यस्य स राशिः, कार्ये कारणोपचारात् त्रिराशिर्भवति । तत् सम्प्रयोजनं यस्य तद्गुणितं त्रैराशिकम् । तत्र प्रमाणं फलमिच्छा चेति त्रयो राशयः । तेषु त**त्प्रमाणं** नाम यत इदं लब्धमिति व्यपदिशति । लब्धं तु **फलम्** । यत्पुनरनेन कियल्लभ्यत इतीदमभिधीयते **तदिच्छा** । यच्च पुनर्जिज्ञास्यं **तदिच्छाफलं** नाम" इति ।

## उद्देशकः - १

कुङ्कुमस्य सदलं पलद्वयं निष्कसप्तमलवैस्त्रिभिर्यदि ।
प्राप्यते सपदि मे वणिग्वर ब्रूहि निष्कनवकेन तत्कियत् ॥

अन्वयः - वणिग्वर ! यदि निष्कसप्तमलवैः त्रिभिः कुङ्कुमस्य सदलं पलद्वयं प्राप्यते , (तर्हि) निष्कनवकेन तत् कियत् (प्राप्यते) (इति) सपदि मे ब्रूहि ।

$\frac{३}{७} \rightarrow \frac{५}{२}$

$९ \rightarrow ?$

$$? = \frac{\left(९ x \frac{५}{२}\right)}{\left(\frac{३}{७}\right)} = \frac{(९ x ५ x ७)}{(२ x ३)} = \frac{१०५}{२} = ५२.५ = ५२ \text{ पलानि } २ \text{ कर्षौ}$$

४ कर्षाः = १ पलम्

# उद्देशकः - २

प्रकृष्टकर्पूरपलत्रिषष्ट्या चेल्लभ्यते निष्कचतुष्कयुक्तम् ।
शतं तदा द्वादशभिः सपादैः पलैः किमाचक्ष्व सखे विचिन्त्य ॥

अन्वयः - सखे ! प्रकृष्टकर्पूरपलत्रिषष्ट्या निष्कचतुष्कयुक्तं शतं लभ्यते चेत् तदा द्वादशभिः सपादैः पलैः किं (प्राप्यते) (इति) विचिन्त्य आचक्ष्व ।

६३ → १०४

$१२\frac{१}{४}$ → ?

## परिभाषा

| | | |
|---|---|---|
| २० वराटकाः | = | १ काकिणी |
| ४ काकिण्यः | = | १ पणः |
| १६ पणाः | = | १ द्रम्मः |
| १६ द्रम्माः | = | १ निष्कः |



# उद्देशकः - ३

द्रम्मद्वयेन साष्टांशा शालितण्डुलखारिका ।
लभ्या चेत् पणसप्तत्या तत्किं सपदि कथ्यताम् ॥

### परिभाषा

| | | |
|---|---|---|
| २० वराटकाः | = | १ काकिणी |
| ४ काकिण्यः | = | १ पणः |
| १६ पणाः | = | १ द्रम्मः |
| १६ द्रम्माः | = | १ निष्कः |



# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

### ०२५ त्रैराशिकम्

१६ - ०५ - २०१९